दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता
■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-102 | 1 | फरवरी 02, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णप्रतिपदा
माघ 20 प्रविष्टांशः मङ्गलमयः भवेत्

2 देविका सिहागः 'थाईलैंड मास्टर्स बैडमिंटन' प्रतियोगितायाः महिला-एकलवर्गस्य (singles) कीर्तिमानं स्वनाम्ना अकरोत्
4 बिलासपुरस्य घुमारवींक्षेत्रे संस्कृतशिक्षकपरिषदः राज्यस्तरीयोपवेशनं सम्पन्नम्;
5 भक्तिकालचिन्तकः सन्तरविदासः : एकं समालोचनात्मकम् अध्ययनम्(जयंतीविशेषः)

# अस्य वित्तीयवर्षस्य आय-व्यय-वित्तमन्त्री निर्मला सीतारमणः पत्रकं प्रस्तुतवती, यस्मिन् क्षमता-निर्माण सौविध्येषु च सविशेषं सबलं प्रतिपादितवती



वित्तमन्त्री निर्मला सीतारमणः लोकसभायां अस्य वित्तीयवर्षस्य आय-व्यय-पत्रकं प्रस्तुतवती। तस्याः एतत् अभिलेखात्मकं नवमं आय-व्यय-पत्रकम् अस्ति। वित्तमन्त्री माघपूर्णिमायाः तथा गुरु-रविदासस्य जन्मशताब्द्याः पावनावसरे प्रोक्तवती यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे प्रशासनेन सदैव परिष्कारार्थं जनहितार्थं च प्राथमिकता प्रदत्ता। अस्मिन् वित्तीय आय-व्यय-पत्रके आत्मनिर्भरभारतं लक्ष्यीकृत्य लोकनिवेशं सबलं प्रतिपादयन् विनिर्माण परिष्काराणां, राजकोषीय-व्यवस्थानां तथा मौद्रिक स्थिरतानां च अनुसरणं विहितवन्तः। एतत् आय-व्यय-पत्रकं विशेषरूपेण क्षमता-निर्माणेषु परिष्कारेषु च ध्यानं केन्द्रीकरोति। एतत् आय-व्यय-पत्रकं युवाशक्ति द्वारा संचालितम् इति वित्तमन्त्री उक्तवती। सा अवदत् यत् एतत् आय-व्यय-पत्रकं आर्थिकविकासं गतिं प्रदातुं, नागरिकाणां क्षमता-निर्माणस्य आकाङ्क्षां पूरयितुं, तथा "सबका साथ, सबका विकास" इति त्रिभिः प्रकल्पैः प्रेरितमस्ति । यस्य लक्ष्यं प्रत्येकस्य परिवारस्य, समुदायस्य, क्षेत्रस्य च संसाधनानां, सौविध्यानां अवसराणां च प्राप्तिं सुनिश्चितं करणीयम् अस्ति। वित्तमन्त्री अवदत् यत् कृषकाः, अनुसूचित जातयः, अनुसूचित जनजातयः, युवानः, निर्धनाः, महिलाः च विकासस्य लाभाः सम्प्राप्नुयुः। प्रशासनस्य संकल्पः शोषितानां वञ्चितानां प्रति च ध्यानं प्रदत्तमस्ति ।

वित्तमन्त्रिणा घोषणा कृताऽस्ति यत् आगामि पञ्चवर्षेषु भारतं वैश्विक-बायोफार्मा-निर्माण-केन्द्ररूपेण विकसितुं दश-सहस्र-कोटि-रूप्यकाणां-परिव्ययेन "बायोफार्मा-शक्ति-परियोजना" समारप्स्यते। श्रम-प्रधान-वस्त्र-क्षेत्रस्य सुदृढीकरणार्थं वित्तमन्त्री खादी ग्रामोद्योग, हस्त-शिल्पानां प्रोत्साहनाय "महात्मा गांधी-ग्राम-स्वराज-उद्यम" परियोजनायाः शुभारम्भाय घोषणा विहिता। सा प्रोक्तवती यत् प्रशासनं नगराणां मध्ये विकास-संयोजक-मार्गरूपेण सप्त-तीव्रवेग-रेलमार्ग-पथं विकसितं करिष्यति। देशस्य वित्तीय-क्षेत्रस्य सुदृढतां प्रकाशयन्ती सा अवदत् यत् प्रशासनेन "विकसित भारताय बैंक-क्षेत्रे उच्चस्तरीय-समितिं निर्मातुं निर्णयं विहितम् अस्ति। यस्य उद्देश्यं वित्तीय बैंक-क्षेत्रस्य व्यापक-समीक्षां कृत्वा वित्तीय-स्थिरता, समावेशनं तथा उपभोक्ता संरक्षणस्य रक्षणम् अस्ति। कृत्रिम बुद्धिमत्तायाः महत्त्वं वर्णयन्ती वित्तमन्त्री अवदत् यत् प्रौद्योगिक्याः स्वीकरणं कृषकाणां, महिलानां, युवानां तथा दिव्याङ्गजनानां सहैव सर्वेषां जनानां हिताय अस्ति, येन ते नूतनाः अवसराः प्राप्नुयुः। देशे क्रीडा-क्षेत्रस्य विकासाय क्रीडा-प्रतिभानां पोषणाय च सा अवदत् यत् प्रशासनं आगामि दशके क्रीडा-क्षेत्रस्य परिवर्तनाय "खेलो-इण्डिया-मिशन" इत्यस्य शुभारंभं करिष्यति।

## सुभाषितम्

**ऊर्ध्वं गच्छन्ति सत्त्वस्था,**
**मध्ये तिष्ठन्ति राजसाः।**
**जघन्यगुणवृत्तस्था,**
**अधो गच्छन्ति तामसाः।।**

भावार्थः- सात्त्विक स्वभाव के (गुणवान और सहृदय) व्यक्ति उन्नति कर समाज में शीर्ष स्थान पर रहते हैं, भोग विलास में लिप्त राजसी स्वभाव के व्यक्ति मध्यम श्रेणी के माने जाते हैं। परन्तु तामसी स्वभाव के (क्रूर तथा दूसरों को हानि पहुंचाने वाले) व्यक्ति निम्नतम श्रेणी के अन्तर्गत वर्गीकृत किए जाते हैं।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

# उपराष्ट्रपतिना ओमंदुर पी. रामासामी रेड्डीयार महोदयेभ्यः श्रद्धाञ्जलिः अर्पिता



उपराष्ट्रपतिः सी.पी. राधाकृष्णनः स्वतन्त्रतासेनानिनः राजनीतिज्ञस्य च ओमंदुर पी. रामासामी रेड्डीयार महोदयस्य जयन्त्यां तस्मै श्रद्धाञ्जलिं समर्पितवान्। सामाजिक-माध्यमेन (Social Media) उपराष्ट्रपतिः उक्तवान् यत् ओमंदुर पी. रामासामी रेड्डीयार महोदयः सत्यनिष्ठायाः, सरलतायाः, निस्वार्थ-जनसेवायाः च आदर्शः आसीत्।उपराष्ट्रपतिः अकथयत् यत् स्वतन्त्र-भारते श्री रेड्डीयार महोदयः मद्रास-प्रेसीडेंसी इत्यस्य प्रथम-मुख्यमन्त्रिरूपेण कार्यं कृतवान् तथा च सुशासनस्य सामाजिक-न्यायस्य च दृढाम् आधारशिलां स्थापितवान्। सः अवदत् यत् श्री रेड्डीयार महोदयस्य दूरदर्शी-नेतृत्वेन बलिदानेन च राष्ट्रसेवायै आगामि-पीढयः निरन्तरं प्रेरिताः भविष्यन्ति।

# प्रधानमंत्री नरेन्द्र मोदी सन्त गुरु रविदास महाराजस्य ६४९ तमे प्रकाशपर्वणि तस्मै श्रद्धाञ्जलिं अर्पितवान्



प्रधानमंत्री नरेन्द्र मोदी महोदयः जालन्धरस्य 'डेरा सचखण्ड बल्लन' इति स्थाने सन्त गुरु रविदास महाराजस्य ६४९ तमे प्रकाशपर्वणि तस्मै श्रद्धाञ्जलिं अर्पितवान् । पद्मश्री सन्त निरंजनदासः तस्य शिष्याः च प्रधानमंत्री-महोदयस्य अभिनन्दनं कृतवन्तः। अस्माकं जालन्धर-संवाददालस्य वृत्तान्तानुसारं, डेरा-स्थानं प्राप्य प्रधानमंत्री महोदयः 'आदमपुर' विमानपत्तनस्य नाम परिवर्तनं कृत्वा 'श्री गुरु रविदासमहाराजजी विमानपत्तनम्, आदमपुरम्' इति अकरोत्। सः लुधियाना-नगरस्य 'हलवारा' विमानपत्तनस्य 'टर्मिनल' भवनस्य अपि आभासी-माध्यमेन (virtually) उद्घाटनं कृतवान्। डेरा-सभां सम्बोधयन् सः अवदत् यत् देशः २०४७ पर्यन्तं 'विकसित भारत' इति लक्ष्यं प्राप्तुं तीव्रगत्या अग्रे सरति।

आर्थिक-विषये सम्बोधनम्-संसदि प्रस्तुते केन्द्रीय-बजटविषये भाषमाणः प्रधानमंत्री मोदी महोदयः अवदत् यत् पञ्जाब-राज्यस्य देशस्य च उद्योगानां लघु-मध्यम-उद्योगानां (MSME) च पूर्णं ध्यानं सुरक्षितम् अस्ति। सः उद्योगपतिभ्यः आह्वानं कृतवान् यत् ते अन्तर्राष्ट्रिय-विपण्याः कृते उच्च-गुणवत्तायुक्तानि भारतीय-उत्पादनानि निर्मान्त्विति। येन ब्रिटिश-शासनात् पूर्वं भारतस्य यत् गौरवम् आसीत्, तत् पुनः प्राप्तुं शक्येत।

# एयरमार्शलः इंदरपालसिंहः वालिया महोदयस्य पदभारग्रहणम्

एयर मार्शलः इंदरपालसिंह वालिया महोदयः नवदिल्ल्यां पूर्वी वायुसेनाकमान (Eastern Air Command) इत्यस्य 'एओसी-इन-सी' (AOC-in-C) इति पदभारं गृहीतवान्। सः १९८८ तमस्य वर्षस्य जून-मासे भारतीयवायुसेनायाः युद्धविमान-विभागे नियुक्तः अभवत्। वायुसेनायाः एषः वरिष्ठः अधिकारी मिग-21, मिग-23, मिग-27, जगुआर तथा च सु-30 एमकेआई इत्यादीनां सर्वेषां युद्धविमानानां चालने निपुणः अस्ति। तस्य उत्कृष्टां सेवां दृष्ट्वा सः 'वायुसेनापदक' तथा 'अति विशिष्टसेवापदक' इत्येताभ्यां सम्मानाभ्यां विभूषितः अस्ति।

# राष्ट्रपतिः द्रौपदी मुर्मू महोदया अमृतोद्यानस्य कृतम् उद्घाटनम्



राष्ट्रपतिः द्रौपदी मुर्मु महोदया नवदिल्ल्यां 'अमृतोद्यानस्य' उद्घाटन-कार्यक्रमे सम्मिलिता अभवत्। राष्ट्रपति-सचिवालयेन एकेन वक्तव्येन सूचितं यत् राष्ट्रपति-भवनस्य अमृत-उद्यानं मङ्गलवासरतः अस्य मासस्य ३१ दिनाङ्कपर्यन्तं सर्वसाधारणाय उद्घाटितं भविष्यति। नागरिकाः सप्ताहे षड्दिनानि प्रातः १० वादनात् सायं ६ वादनपर्यन्तं उद्यानस्य भ्रमणं कर्तुं शक्नुवन्ति। रक्षण-कार्यकारणतः सोमवासरे तथा च ४ मार्च दिनाङ्के होली-पर्वणः कारणतः उद्यानं पिहितं (बन्द) भविष्यति। राष्ट्रपति-सचिवालयेन उक्तं यत्: ३ मार्चः रक्षाकर्मिभ्यः (Defense Personnel) आरक्षितम्।

५ मार्चः ज्येष्ठनागरिकेभ्यः आरक्षितम्। १० मार्चः महिलाभ्यः जनजातीय-महिला-स्वयं-सहायता-समूहेभ्यः च आरक्षितम्।

१३ मार्चः दिव्यांगजनेभ्यः विशिष्टश्रेणीभ्यः च आरक्षितम्।

प्रवेश-प्रक्रिया अन्य-विशेषताः च

उद्याने प्रवेशः निःशुल्कः अस्ति, किन्तु ऑनलाइन-माध्यमेन एव उपलब्धः भविष्यति। दर्शकाः visit.rashtrapatibhavan.gov.in इति सङ्केतस्थले स्वकीयं प्रवेशपत्रं (Ticket) आरक्षितं कर्तुं शक्नुवन्ति।

अस्मिन् वर्षे पर्यटकाः 'ट्यूलिप' (Tulip) पुष्पिकाः, विविधाः पाटल-पुष्पाणि (Roses) च विहाय 'बबलिंग ब्रूक' (निर्झर-युक्ता जलधारा) तथा च 'रिफ्लेक्सोलॉजी-मार्गैः' युक्तं वट-वृक्ष-उद्यानं (Banyan Garden) द्रष्टुं शक्ष्यन्ति।

# प्रशासनं कृषकाणां आये वृद्धिं कर्तुं प्रतिबद्धोऽस्ति- वित्तमन्त्रिणः अर्थसंकल्पः भाषणम्




प्रशासनं कृषकाणां आये वृद्धिं कर्तुं, दिव्याङ्गजनानां कृते मानसिक स्वास्थ्य-आघात-सम्बन्धी-चिकित्सां प्रदातुं, विकास- वृत्यवसराणां गर्ति प्रदातुं अपि च पूर्वोदय-राज्येषु तथा उत्तर-पूर्वीय क्षेत्राणां विकासाय विशेषत्वेन प्रतिबद्धोस्ति। सा अरुणाचल प्रदेशे, सिक्किमे, असमे, मणिपुरे, मिजोरमे, त्रिपुरायां च बौद्ध-परिपथानां विकासाय एकस्याः योजनायाः समारम्भाय घोषणा कृतवती। सा प्रोक्तवती यत् वित्तीय-वर्षे सकल-गृह उत्पादस्य चतुर्दशमलवाधिक-त्रि-प्रतिशतमितं राजकोषीय-अपचितिः भविष्यति इति अनुमानितम्। यद्यपि वर्तमान-वित्तीय-वर्षे एतत् चतुर्दशमलवाधिक-चतुर्प्रतिशतमितं आसीत्। सा अवदत् यत् प्रशासनेन आयकर शुल्क-प्रतिवेदनस्य समय-सीमा विस्तारिताऽस्ति। जनाः जुलाई मासस्य एकत्रिंशत् दिनांक पर्यन्तं प्रतिवेदनं दातुं शक्नुवन्ति, तथा व्यावसायिक संस्थाभ्यः न्यासेभ्यश्च अगस्त-मासस्य एकत्रिंशत् दिनांक पर्यन्तं प्रतिवेदनस्य समयः भविष्यति। वित्तमन्त्री अवदत् यत् पञ्चविंशत्यधिक-द्विसहस्र-तम-वर्षस्य आयकर अधिनियमः, षडविंशत्यधिक-द्विसहस्र-तम वर्षस्य एप्रिल् मासस्य प्रथम दिवसात् प्रवर्तिष्यते। सा अपि अवदत् यत् सरलीकृताः आयकर-नियमाः तथा प्रपत्राणि शीघ्रमेव अधिसूचितानि भविष्यन्ति ।

# देविका सिहागः 'थाईलैंड मास्टर्स बैडमिंटन' प्रतियोगितायाः महिला-एकलवर्गस्य (singles) कीर्तिमानं स्वनाम्ना अकरोत्




भारतस्य युवा बैडमिंटन-क्रीडिका देविका सिहाग 'थाईलैंड मास्टर्स बैडमिंटन' प्रतियोगितायाः महिला-एकलवर्गस्य (singles) कीर्तिमानं स्वनाम्ना अकरोत्। फाइनल-मुकाबले मलेशिया-देशस्य गोह जिन वेई इति क्रीडिकायाः स्पर्धातः निवृत्तेः (retire) पश्चात् देविका प्रथमवारं बीडब्ल्यूएफ (BWF) सुपर 300 कीर्तिमानं विजितवती।

हरियाणा-राज्यस्य निवासिनी २० वर्षीया देविका तदा 21-8, 6-3 अङ्कैः अग्रे आसीत्, यदा विश्वे ६८तमे स्थाने विद्यमाना द्विवारं विश्व-जूनियर-विजेत्री गोह 'हैमस्ट्रिंग' वेदनाकारणात् क्रीडां त्यक्तुं निर्णयं कृतवती। देविका सिहागः गतकाले अतिशोभनं प्रदर्शनं कृतवती अस्ति। सा २०२५ तमस्य वर्षस्य अगस्तमासे मलेशिया इंटरनेशनल स्पर्धायां प्रथमम् अन्तर्राष्ट्रियकीर्तिमानं प्राप्तवती। तदनन्तरं सा २०२५ तमे वर्षे विश्वविश्वविद्यालयक्रीडासु भारतस्य मिश्रितदलस्य (mixed team) कृते कांस्यपदकं जेतुं महत्त्वपूर्णं योगदानं दत्तवती। सा गतसत्रे 'इंडोनेशिया मास्टर्स सुपर 100' मध्ये उपविजेत्री आसीत्, तथा च २०२४ तमे वर्षे चतुर्णां प्रतियोगितानां फाइनल-प्रवेशं प्राप्तवती आसीत्।

# केन्द्रीयबजट-प्रतिक्रिया: भाजपा-पक्षेण प्रशंसितम्, काङ्ग्रेस-पक्षेण 'निराशाजनकम्' इति उक्तम्






**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेशस्य सत्ताधारी 'काङ्ग्रेस' दलेन केन्द्रीयबजटं 'निराशाजनकम्' इति घोषितम्, यदा तु प्रतिपक्षी 'भाजपा' दलेन एतत् 'ऐतिहासिकं' 'सर्वस्पर्शी' च इति वर्णितम्।

## भाजपा-नेतृणां प्रतिक्रिया: "विकासस्य अवसराणां च बजट्"

विपक्षस्य नेता जयरामठाकुरः अवदत् यत् इदं बजटं 'विकसित-भारत-२०४७' सङ्कल्पं पूरयिष्यति। १२.७५ लक्षरूप्यकाणां करमुक्तायः (Tax-free income) मध्यमवर्गस्य कृते महती राहतः अस्ति। हिमाचलस्य कृते 'माउण्टेन ट्रेल' परियोजना पर्यटनं सुदृढं करिष्यति।सुरेशकश्यपः सांसदः अवदत् प्रधानमन्त्रिणः नेतृत्वे इदं बजटं 'आत्मनिर्भर-भारत' दिशि ऐतिहासिकं पदक्षेपम् अस्ति।अनुरागसिंहठाकुरः अकथयत् यत् अयं बजटः युवकानां आकाङ्क्षाणां पूर्तये आर्थिकसुधाराणां च प्रतीकः अस्ति।

राजीवभारद्वाजः सांसदः अवोचत् यत् 'हेल्थ एण्ड केयर वर्कफोर्स' तथा 'आयुष-क्षेत्र' सम्बद्धाः निर्णयाः हिमाचलस्य कृते लाभप्रदाः भविष्यन्ति।हर्षमहाजनः राज्यसभासांसदः अकथयत् यत् MSME Growth Fund इत्यनेन लघु-उद्योगानां युवकानां च साक्षात् लाभः भविष्यति।कङ्गनारनौत लोकसभासांसदः उक्तवती यत् १५ सहस्रविद्यालयेषु AVGC Labs तथा 'डिजाइन स्कूल' इति योजनाभिः देशः 'ग्लोबल क्रिएटिव हब' भविष्यति।इन्दुगोस्वामी राज्यसभासांसदः अकथयत् यत् 'शी मार्ट' (She Marts) योजना महिलानां सशक्तीकरणाय आर्थिक-स्वतन्त्रतायै च महती अस्ति।

## काङ्ग्रेस-नेतृणां प्रतिक्रिया: "हिमाचलस्य उपेक्षा कृता"

नरेशचौहानः (प्रधान-मीडिया-परामर्शदाता): सः अवदत् यत् 'रेवेन्यू डेफिसिट ग्रांट' (RDG) समाप्तं कृत्वा हिमाचलस्य ४० सहस्रकोटिरूप्यकाणां हानिः कृता। अयं निर्णयः अतीव चिन्ताजनकः अस्ति।

प्रतिभासिंह पूर्वसांसदः अकथयत् यत् बजट्-मध्ये कृषि-उद्यान-पर्यटनक्षेत्राणां कृते किमपि नूतनं नास्ति। प्राकृतिक-आपदा-ग्रस्ताय हिमाचलाय विशेष-संकुल-घोषणा न कृता।

कुलदीपसिंहराठौरः राष्ट्रिय-प्रवक्ता आरोपं कृतवान् यत् एतद् बजटम् केवलं 'विवरणानां मायाजालम्' अस्ति, आपदा-पीडित-प्रदेशाय किमपि न दत्तम्।

## कर्मचारिणां पैन्शन-धारकाणां च निराशा त्रिलोकठाकुरः

अराजपत्रित कर्मचारी महासंघः अकथयत् यत् आयकर-सीम्नि (Income Tax Slab) परिवर्तनं न जातम्, अतः कर्मचारिणः निराशाः सन्ति।

### भरतशर्मा कर्मचारी नेता अकथयत् यत्'पुरातन-पैन्शन-योजना' (OPS) विषये किमपि न घोषितम्

के.एल. गौतमः मुख्य संरक्षकः हिमाचलप्रदेश केंद्रीय-कर्मचारी एवं श्रमिकसमन्वयसमितिः अकथयत् यत् ८-वेतन-आयोगस्य (8th Pay Commission) विषये घोषणा न कृता, येन १५ सहस्रकेन्द्रीयकर्मचारिणः दुःखिताः सन्ति।

# संघीय बजट २०२६: हिमाचलप्रदेशाय पर्वतीय-पथानां (माउंटेन ट्रेल) निर्माणस्य घोषणा



**हिमसंस्कृतवार्ताः- शिमला।** केंद्रीय वित्तमन्त्री निर्मलासीतारमणमहोदया संसदि स्वस्य निरन्तरं नवमं बजटं प्रस्तुतवती। अस्मिन् बजटे वित्तमन्त्रिणा घोषणा कृता यत् हिमाचलप्रदेशे पर्वतीय-पथाः (माउंटेन ट्रेल) निर्मास्यन्ते। एते पर्वतीय-पथाः पर्वतप्रदेशेषु वा अरण्यप्रदेशेषु निर्मिताः मार्गाः सन्ति, ये मुख्यतया पदयात्रा, पर्वत-द्विचक्रिकायानं, साहसिकक्रीडाः प्रयोजनाय च उपयुज्यन्ते।

पर्यटनप्रधानस्य राज्यस्य कृते एषा घोषणा अत्यन्तं महत्त्वपूर्णा भविष्यति। पर्वतीय-पथानां निर्माणेन हिमाचलप्रदेशे पर्यटनस्य प्रवर्द्धनं भविष्यति। दीर्घाः ट्रेकिङ्मार्गाः अपि अस्मिन् परियोजनायां समावेशिताः भविष्यन्ति। एतदर्थं हिमाचलप्रदेश- सर्वकार केन्द्र-सर्वकाराय प्रस्तावं प्रेषयिष्यति। तदनन्तरं केन्द्रसर्वकारात् स्वीकृतिः तथा बजटस्य अनुमोदनं लभ्यते। बजट-घोषणायाः अनन्तरं चयनिताः ट्रेकिङ मार्गाः विकसिताः भविष्यन्ति।

## हिमाचलप्रदेशस्य दीर्घतमः ट्रैकमार्गः

हिमाचलप्रदेशस्य दीर्घतमः ट्रेकः पिन- पार्वती-उपत्यकायाम् अस्ति। अयं ११० किलोमीटर दीर्घः ट्रेकः मणिकर्णतः आरभ्य लाहुल-घाटीपर्यन्तं गच्छति। अस्मिन् मार्गे पार्वती-दर्रः सर्वाधिकः संकटपूर्णः मन्यते, यस्य ऊर्ध्वता ५४०० मीटरपर्यन्तं वर्तते।

### धौलाधार-श्रेण्याम् अधिकतमाः ट्रेकिङ-मार्गाः

कांगड़ा-जनपदस्य धौलाधार-श्रेण्यां सर्वाधिकाः १७ ट्रेकिङ मार्गाः सन्ति। धौलाधार-पर्वतेषु शाहपुरस्य धारकण्डीतः आरभ्य बृहद्वंगालपर्यन्तं ट्रेकिङ मार्गाः दृश्यन्ते। एतेषु पञ्च मार्गाः अत्यन्तं जोखिमयुक्ताः, त्रयः न्यून-जोखिमयुक्ताः, नव च सरलाः ट्रेकिङ मार्गाः सन्ति।

### कांगड़ा-जनपदस्य सरलाः ट्रेकिङ्मार्गाः

सरल-ट्रेकिङ्मार्गेषु-
•नड्डी–करेरी (रावा मार्गेण)- एकदिनम्
•सतोवरी-घेरा–करेरी- एकदिनम्
•बोह–खबरू (चन्दरेला–दरकुण्ड मार्गेण)- एकदिनम्
•इन्द्रुनाग– भंगरोटू– कर्थानी– त्रियुण्ड- द्विदिनम्
•उतराला–जालसू-द्विदिनम्
•बिलिंग–राजगुंधा–लोहारड़ी–ज्वारा- द्वि-त्रिदिनम्
•सरी-पास, बीड़–बिलिंग– राजगुंधा- एकदिनम्
•खड़ौता–ठठारना- एकदिनम्
•नड्डी–गुणा-मन्दिरम्- एकदिनम्

न्यून-जोखिमयुक्ताः, जोखिमपूर्णाः ट्रेकिङ्मार्गाः
•न्यून-जोखिमयुक्तेषु मार्गेषु करेरी-लेक (बलेनीपास मार्गेण) मिनकैनी–मैहला- चतुर्पञ्चदिनपर्यन्तम्
•जदरांगल–करडियाणा–भौंट–हिमानी–चामुण्डा-द्विदिनम्
•गज-पास घेरा–बोंठू- चतुर्दिनम्

### अत्यन्तं जोखिमपूर्णेषु मार्गेषु-

•टंग नरवाणा–खेतल अलूड– हिमानी- चामुण्डा (बर्ड्स पैराडाइज)- त्रि-चतुर्दिनम्
•जिया–सूपधार–तालंग-लेक- त्रिदिनम्
•राजगुंधा–थमसर–बृहद्वंगाल- षड्- सप्तदिनम्
•गलू– धर्मकोट– होली– मणिमहेश- षड्दिनम्
•सेवन-लेक, धौलाधार श्रेणी- पञ्च- सप्तदिनम्

एवमेव, षोडशेन वित्तायोगेन हिमाचलप्रदेशं सहितं लघु-राज्यानां कृते आरडीजी-अनुदानस्य प्रस्ताव न कृतः। अस्य परिणामतः हिमाचलप्रदेशाय प्रायः ४० सहस्र-कोटि-रूप्यकाणां हानिः भविष्यति। एतत् अनुदानं स्थगिते सति हिमाचलप्रदेशं सहितं सर्वेषां लघु-राज्यानां कृते गम्भीरा परिस्थितिः उत्पन्ना अस्ति। पञ्चदशेन वित्तायोगेन तु हिमाचलप्रदेशाय ३५–४० सहस्र-कोटि-रूप्यकाणां सहायता प्रदत्ता आसीत्।

# १६-तमे वित्त-आयोगे हिमाचलप्रदेशः प्रायः १.३ लक्षकोटिरूप्यकाणि प्राप्तुं शक्नोति



**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेशाय १६-तमे वित्त-आयोगे (२०२६-२७ तः २०३०-३१ पर्यन्तं) केन्द्रसर्वकारतः प्रायः १.३ लक्षकोटिरूप्यकाणि (₹1.3 Lakh Crore) प्राप्तुं सम्भावना अस्ति। इयं राशिः विगत-वित्त-आयोगस्य तुलनायां महती वृद्धिं सूचयति।

*वित्तीय-अनुमानस्य प्रमुखाः बिन्दवः*

➢ **केन्द्रीय-करेषु अंशभागः (Tax Devolution):** २०२६-२७ वर्षस्य बजेट-अनुमानस्य अनुसारं हिमाचलप्रदेशाय केन्द्रीय-करेषु अंशरूपेण प्रायः १३,९५० कोटिरूप्यकाणि प्रदातुं प्रावधानं कृतम् अस्ति। यदि प्रतिवर्षं ८ प्रतिशतं वृद्धिः भवेत्, तर्हि पञ्चवर्षेषु इयं राशिः ८१,००० कोटिरूप्यकाणि भविष्यति।

> **अनुदान-राशिः (Grants-in-aid):** हिमाचल-सदृश-पर्वतीयराज्याय राजस्व-हानि-अनुदानम् (Revenue Deficit Grant), आपदा-प्रबन्धन-साहाय्यं तथा स्थानीय-निकाय-अनुदानं च अतीव महत्त्वपूर्णं वर्तते। अनुमानः अस्ति यत् आगामी-पञ्चवर्षेषु एषा राशिः ४५,००० तः ५०,००० कोटिरूप्यकाणां मध्ये भवितुं शक्नोति।

**महत्त्वपूर्णं परिवर्तनम्**

१५-तमे वित्त-आयोगे (२०२१-२६) हिमाचलप्रदेशाय प्रायः ८२,००० कोटिरूप्यकाणां संस्तुतिः (Recommendation) कृता आसीत्। तस्य तुलनायां १६-तमे वित्त-आयोगे प्रस्तावित-हस्तान्तरणं (Transfer) प्रायः ५० प्रतिशतं अधिकं वर्तते।
केन्द्रीय-वित्तमन्त्री निर्मला सीतारमण महोदया बजट-प्रस्तुत्यनन्तरं १६-तमे वित्त-आयोगस्य प्रतिवेदनं संसदि उपस्थापितवती। हिमाचलराज्यस्य कृते, यत् स्वव्ययार्थं आपदा-ऋण-मुक्त्यै च केन्द्रस्य उपरि निर्भरं वर्तते, एतद् आवंटनं महदाश्रयं प्रदास्यति।

# सर्वभारतीये चतुर्थक्षेत्रीयरूपकमहोत्सवे श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयस्य नाटकं श्रमफलम् इति उपविजेतृपदम् अवाप्तम्



**हिमसंस्कृतवार्ता डॉ . निशिकान्तपाण्डेयः।** केन्द्रीयसंस्कृतविश्वविद्यालयस्य चतुर्थसर्वभारतीय-क्षेत्रीयरूपकमहोत्सवः केन्द्रीयसंस्कृतविश्वविद्यालयान्तर्गते श्रीसदाशिवपरिसरे २४.०१.२०२६ दिनाङ्कतः २६.०१.२०२६ दिनाङ्कपर्यन्तं महताडम्बरेण परिपालितः। तत्र केन्द्रीयसंस्कृतविश्वविद्यालयस्य पूर्वक्षेत्रीयपरिसराणाम् आदर्शसंस्कृतमहाविद्यालयानां च कुशीलवानां नाट्यशास्त्रसुपारङ्गतानां संस्कृतछात्राणां रूपकस्पर्धा अभवत्। अत्र भारतवर्षस्य विभिन्नेषु राज्येषु यथा मणिपुरम्, त्रिपुरा, विहारः, झारखण्डः, ओडिशा, पश्चिमबङ्गः इत्यादिषु समागताः परिसरद्वयं तथा चत्वारः आदर्शसंस्कृतमहाविद्यालयाः भागं गृहीतवन्तः। एतेषु पश्चिमबङ्गस्थकोलकातान्तर्गतस्य श्रीसीतारामवैदिक-आदर्शसंस्कृतमहाविद्यालयस्य छात्राः रूपकोत्सवस्य द्वितीयदिवसे आचार्येण सूर्यमणिरथवर्येण विरचितं श्रमफलम् इति नाटकं प्रादर्शयन्। सर्वैः दर्शकैः विद्वद्भिश्च नाटकमिदं सानन्दं सहर्षञ्च प्रशंसितम्। ततः तृतीयदिवसे पुरस्कारवितरणोत्सवे प्रदर्शितेषु सर्वेषु नाटकेषु द्वितीयस्थानम् अवाप्तम्। किञ्च केन्द्रीयसंस्कृतविश्वविद्यालयस्य अखिलभारतीयरूपकमहोत्सवे प्रदर्शनार्थम् अस्य नाटकस्य चयनं जातम्। महाविद्यालयस्य समेऽपि प्राध्यापकाः कर्मचारिणश्च विजेतृणां छात्राणां कृते शुभाशयान् अभिनन्दनानि च विज्ञापितवन्तः। महाविद्यालयस्य छात्राणाम् एषा सफलता पश्चिमबङ्गस्य सांस्कृतिकक्षेत्रे नूनं गौरवाय भवति।

# एतत् आय-व्यय-संकल्प-पत्रम् 'मेक इन इण्डिया' तथा 'आत्मनिर्भर भारतम्' चेत्येतयोः पदक्षेपयोः नूतनां गतिं प्रदातुं महत्वाकाङ्क्षी संरचनां प्रस्तौति - प्रधानमन्त्री नरेन्द्र मोदी

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् अस्य वर्षस्य केन्द्रीय आय-व्यय-पत्रकं 'मेक-इन-इण्डिया' तथा 'आत्मनिर्भर-भारत' इति उपक्रमयोः नूतनं प्रगतिं प्रदातुं महत्त्वाकाङ्क्षी संरचनां प्रस्तौति। एकस्मिन् दृश्य-श्रव्य-सन्देश माध्यमेन श्रीमोदी अवदत् यत् अस्य वर्षस्य आय-व्यय-पत्रकं भारतस्य परिष्काराणां कृते नूतनां ऊर्जा तथा गतिं प्रदास्यति। सः अवदत् यत् एतत् अर्थ-संकल्प-पत्रम् अद्यतनीयाः आकाङ्क्षाः यथार्थतां नयति तथा भारतस्य उज्ज्वल भविष्यस्य आधारं सुदृढं करोति। प्रधानमन्त्री एतदपि अवोचत् यत् एतत् एकं विशिष्टं अर्थ-संकल्प-पत्रम् अस्ति, यत् राजकोषीय अपचितिं न्यूनीकरणे तथा मुद्रा स्फीति-नियन्त्रणाय केन्द्रितम् अस्ति । प्रधानमन्त्री अवदत् यत् अद्यतनीयं आय-व्यय-संकल्प-पत्रम् ऐतिहासिकं अस्ति तथा च देशस्य सशक्तानां नारीणां भावनां प्रतिबिम्बयति। सः अवदत् यत् एतत् बहुशः अवसराणां द्वारम् अस्ति, यत् वर्तमानस्य स्वप्नान् साकारयति तथा च भारतस्य उज्ज्वलभविष्यस्य आधारं सुदृढं करोति । श्रीमोदी अस्मिन् विषये सबलं प्रतिपादितवान् यत् एतत् सप्त चत्वारिंशदधिक-द्वि-सहस्र-तम-वर्षं यावत् भारतं विकसितराष्ट्र कर्तुं दिशि उच्चतरम् आधारं अस्ति। प्रधानमन्त्री मोदी अवदत् यत् प्रत्येकस्मिन् जनपदे छात्राणां कृते नूतनानां छात्रावासानां निर्माणस्य अभियानम् शिक्षां अधिकां सुलभां करिष्यति। सः एतदपि अवदत् यत् कृषि-दुग्धोत्पादन-मत्स्यपालन चेत्यादिषु क्षेत्रेषु प्रशासनेन सदैव प्राथमिकता प्रदत्ता।

# बिलासपुरस्य घुमारवींक्षेत्रे संस्कृतशिक्षकपरिषदः राज्यस्तरीयोपवेशनं सम्पन्नम्; टी. जी. टी. संवर्गे पूर्ण-समावेशाय पदोन्नतये च प्रबला अभ्यर्थना





**हिमसंस्कृतवार्ताः- घुमारवीं, बिलासपुरम्, १ फरवरी, २०२६।** हिमाचल- राजकीय- संस्कृत- शिक्षक-परिषदः राज्यस्तरीयोपवेशनं रविवासरे बिलासपुर-जनपदस्य घुमारवींक्षेत्रे प्रदेशाध्यक्षस्य आचार्यः कमलकान्तगौतमस्य अध्यक्षतायां साफल्येन सम्पन्नम्। अस्मिन् उपवेशने दश-जनपदानां (१०) प्रतिनिधिभिः भागः गृहीतः, यैः संस्कृतशिक्षकाणां छात्राणां च हिताय स्व-परामर्शाः प्रस्तुताः।

## संस्कृत-शिक्षकाणां भावनानां सम्मानं कुर्यात् सर्वकारः- कमलकान्तगौतमः

उपवेशनं सम्बोधयन् प्रदेशाध्यक्षः उक्तवान् यत् परिषद् सर्वदा विभागेन सह संवाद-माध्यमेन संस्कृतस्य उत्थानार्थं प्रयत्नशीला अस्ति। सः अवदत् यत् सर्वकारेण संस्कृत-शिक्षकाणां पदनाम परिवर्तनं कृत्वा 'टी. जी. टी. (संस्कृतम्)' इति तु कृतम्, किन्तु अस्य पूर्ण-क्रियान्वयनं विसंगतीनां निवारणं च अद्यापि शेषं वर्तते। परिषद् बोधितवती यत् शिक्षकवर्गः प्रदेशस्य वित्तीयस्थितिं जानाति अतः सः धैर्यपूर्वकं सर्वकारेण सह अस्ति, किन्तु केचन प्रशासनिक-नीतिगत-विषयाः सन्ति ये विना कञ्चित् अतिरिक्तं वित्तीय-भारं तत्क्षणं प्रवर्तयितुं शक्यन्ते।

## परिषदा मुख्यरूपेण अधोलिखित-बिन्दवः सर्वकारस्य समक्षं स्थापिताः

१. सी. एण्ड वी. संवर्गात् पूर्णमुक्तिः वरिष्ठतालाभश्च
परिषदः तर्कः अस्ति यत् यदा योग्यता कार्यं च टी. जी. टी. सदृशं वर्तते, तदा संस्कृत-शिक्षकान् अद्यापि सी. एण्ड वी. (C&V) संवर्गे स्थापयितुं नैव उचितम्। अभ्यर्थनाः यावत् पूर्ण-वित्तीयलाभाः न लभ्यन्ते, तावत् विद्यालयेषु विद्यालय-गतिविधिषु प्रभारीरूपेण च टी. जी. टी. संस्कृत-शिक्षकान् अन्य- टी. जी. टी. शिक्षकैः सह वरिष्ठताक्रमे समानरूपेण स्थापयितव्यम्।
**लाभः-** टी. जी. टी. संवर्गे पूर्ण- स्थानान्तरणनीत्या प्रदेशे सर्वत्र स्थानान्तरणसुविधा भविष्यति, येन सहस्राणां शिक्षकाणां वैयक्तिकसमस्यानां समाधानं भविष्यति।

### २. राज्यस्तरीया वरिष्ठता-सूच्याः (Seniority List) निर्माणम्

टी. जी. टी. संस्कृतशिक्षकेभ्यः प्रवक्ता- (Lecturer), मुख्याध्यापक- (Headmaster) रूपेण पदोन्नतेः अधिकारः विभागेन दत्तः अस्ति। अतः शिक्षा-निदेशालयः शीघ्रमेव टी. जी. टी. संस्कृत-शिक्षकाणां राज्यस्तरीयां वरिष्ठता-सूचीं निर्मातुम् आदेशं दद्यात्, येन भविष्ये पदोन्नतिप्रक्रिया निर्बाधं प्रचलेत्।

### ३. पदोन्नतौ प्रतिशततायाः (Quota) निर्धारणम्-

सम्प्रति टी. जी. टी. संवर्गे पञ्चश्रेणयः (Arts, Medical, Non-Medical, Sanskrit, Hindi) समाविष्टाः सन्ति। अतः प्रवक्ता-मुख्याध्यापकपदेषु पदोन्नत्यर्थं प्रत्येकवर्गस्य प्रतिशतता (Percentage/Quota) स्पष्टरूपेण निर्धारणीया, येन सर्वेभ्यः समानाः अवसराः प्राप्येरन् भविष्ये च विधिक-विवादाः न भवेयुः।

### ४. अवशिष्टानामपि शिक्षकाणां समानधारायां समावेशाय व्यवस्था:

अनेन सहैव उपस्थितैः प्रतिनिधिभिः सर्वकारः अभ्यर्थितः यत् ये शास्त्री-शिक्षकाः 'बी.एड.' (B.Ed.) सन्ति, 'टैट' (TET) परीक्षोत्तीर्णाः न सन्ति (यतोहि तेषां नियुक्ति-समये 'टैट' इत्यस्य अनिवार्यता नासीत्), ते अपि अस्यां धारायां समावेष्टव्याः यतः तेऽपि अस्य पदस्य योग्याः पात्राश्च सन्ति। अपि च, ये शास्त्री-शिक्षकाः प्रशिक्षिताः न सन्ति, तेषां कृते 'ब्रिज-कोर्स' (सेतु-पाठ्यक्रमः) आयोजनीयः येन ते अपि प्रशिक्षणं प्राप्य इमं लाभं प्राप्तुं शक्नुयुः। उपवेशनान्ते आयोजितायां पत्रकार-गोष्ठ्यां पदाधिकारिणः अवदन् यत् संस्कृत-शिक्षकाः स्वकीयानां न्यायोचित-अभ्मर्थनानां कृते बद्धाः सन्ति। परिषद् विश्वासं करोति यत् सर्वकारः शिक्षा-विभागश्च शीघ्रमेव एतासाम् अभ्यर्थनानां विषये अधिसूचनां प्रसारयिष्यति।अस्मिन् अवसरे राज्य-कार्यकारिण्याः महासचिवः डॉ. अमनदीपशर्मा, वित्तसचिवः लोकपालः, सङ्घटनमन्त्री ललितशर्मा, उपाध्यक्षः डॉ पद्मनाभः, वेदप्रकाशपराशरः, सदस्याः, पूर्व-पदाधिकारिणः, विविधानां जनपदानाम् अध्यक्षाः जिलापदाधिकारिणः च विशेषरूपेण उपस्थिताः आसन्।



## सुभाषित-रसास्वादः

### तत्त्वज्ञाननीति

**श्लोकः- "उभ्याभ्यामेव पक्षाभ्यां
यथा खे पक्षिणां गतिः|
तथैव ज्ञानकर्मभ्यां
जायते परमं पदम् || "**

अर्थः- पक्षद्वयेन यथा खगाः आकाशे उड्डीयन्ते तथैव ज्ञानकर्मयोः संयोगेन मनुष्यः उच्चतमं पदं प्राप्यते |

गूढार्थः- केवलं ज्ञानप्राप्तिः एव पर्याप्त नास्ति | तस्य सह कर्म अपि आवश्यकम् अस्ति | कर्मनः परिभाषा विस्तृता अस्ति | ज्ञानस्य अहङ्कारः न भवेत अतः कर्म आवश्यकं करणीयम् | उभौ मिलित्वा परमपदं ददाति |

**डा. वर्षा प्रकाश टोणगांवकर , पुणे / महाराष्ट्रम्©**

## वार्ता-संवादः

**नन्दिनीः** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्याः** नमस्ते नन्दिनि। गम्भीरा वार्ता मया पठिता। "गूढ-मेदसा मस्तिष्कं जीर्णं क्रियते" इति वैज्ञानकैः शोधितम्।

**नन्दिनीः** तत् तु चिन्ताजनकम्। अमेरिका-देशेऽपि काचित् विचित्र-घटना श्रुता खलु?

**काव्याः** आम्। काभ्याञ्चित् दम्पतिभ्यां चिकित्सालयस्य उपरि अभियोगः कृतः। आभ्यां श्वेतवर्णाभ्यां भिन्न-कुलोत्पन्नः शिशुः लब्धः। तत्र गर्भ-विपर्ययः जातः इति ज्ञातम्।

**नन्दिनी**: अहो कष्टम्! अपरत्र, इन्दौर-नगरस्य विषयः सुखदः। तत्र किं दृष्टम्?

**काव्याः** विदेशस्थया भारतीय-महिलाया इन्दौर-नगरस्य स्वच्छता प्रशंसिता। "अन्यैः नगरैः अपि एतत् अनुकरणीयम्" इति तया उक्तम्।

**नन्दिनीः** सत्यम्। अन्ते, घृत-प्रिय-शुनकस्य कथा का?

**काव्याः** "यावत् घृतं न दीयते, तावत् न खादामि" इति तेन हठः कृतः। यदा स्वामिना घृतं परिवेशितम्, तदा एव भोजनं खादितम्।

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

## उन्मादहृदये मे स्पन्दः,प्रियाऽस्ति तूष्णीका

मदहोश दिल की धड़कन चुप सी तन्हाई --")
M - उन्मादहृदये मे स्पन्दः,प्रियाऽस्ति तूष्णीका
उन्मादहृदये मे स्पन्दः,प्रियाऽस्ति तूष्णीका
संवृतः चन्द्रः किं क्व केशास्ते समेधिताः
F - उन्मादहृदये मे स्पन्दः,प्रियोऽस्ति तूष्णीं हि
उन्मादहृदये मे स्पन्दः,प्रियोऽस्ति तूष्णीं हि
पुनस्ते ही,स्मरणे हा,लीयेयाऽनु त्वयि
M - उन्मादहृदये मे स्पन्दः,प्रियाऽस्ति तूष्णीं हि -- (००)
हुं हुं हुं हुं आ आआआ हुं हुं हुं हुं
M - ए रात्रीयते,लम्बरात्रे न स्वापं भजे,किमकरोः
F - ए अन्वयाः,हृत्सु नोऽपि ह स्पन्दाचयाः,किमकरोः
M - केशान् किरेः,शयेऽहं,काङ्क्षे त्वयि लीयेऽहम्
F - उन्मादहृदये मे स्पन्दः,प्रियोऽस्ति तूष्णीं हि
ए ते ही उन्मादः,न कुर्यात् कदा मे हानिम्
M - उन्मादहृदये मे स्पन्दः,प्रियाऽस्ति तूष्णीं हि -- (०१)
F - वक्ताहे यत् तुण्डे तत्तु मे नेत्रं हि तत्,ब्रवीति हे
M - हृत्सु तव स्थेय आसीन्मे विष्टपेऽस्मिन् अचिकित्सम्
F - आलगतान्मदीयाहृत्सु,यत् मिलतीह हृन्नु कदाचित्
M - उन्मादहृदये मे स्पन्दः,प्रियाऽस्ति तूष्णीं हि
F - उन्मादहृदये मे स्पन्दः,प्रियोऽस्ति तूष्णीं हि
M - हृन्नीतं,प्राणान्नू नेता इदं प्रेमजालम्
F - उन्मादहृदये मे स्पन्दः,प्रियोऽस्ति तूष्णीं हि
M - प्रियाऽस्ति तूष्णीं हि
F - प्रियोऽस्ति तूष्णीं हि -- (०२)
रचयिता - डा.रुरुकुमारमहापात्रः(अध्यापकः)
राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः

# भक्तिकालचिन्तकः सन्तरविदासः : एकं समालोचनात्मकम् अध्ययनम्(जयंतीविशेषः)



**डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी, भागलपुर,बिहार।** भारतीयभक्तिसम्प्रदायः मध्ययुगे सामाजिकधार्मिकचेतनयोः महान् आन्दोलनरूपेण विकसितः। अस्मिन् भक्तिकाले अनेके महापुरुषाः जाताः, ये समाजे व्याप्तान् आडम्बरान्, जातिभेदं, स्पृश्यास्पृश्यं, धार्मिककठोरतां च तीव्रतया प्रतिपाद्य विरोधं कृतवन्तः। तेषु सन्तेषु सन्तरविदासः (रैदासः इत्यपि प्रसिद्धः) विशिष्टस्थानं धारयति।एषःन केवलं भक्तिकालस्य कविः , अपि तु महान् समाजचिन्तकः, मानवतावादी दार्शनिकः, निर्गुणभक्तेः प्रभावशाली प्रवर्तकः च आसीत्।सन्तरविदासः स्वभक्तिकाव्येन, तत्त्वचिन्तनेन, सामाजिकसमानतायाः उद्घोषेण च भारतीयसमाजे नवचेतनां प्रसारितवान्। एतस्य विचाराः अद्यापि समाजसुधारस्य मार्गदर्शकाः सन्ति।

सन्तरविदासः उत्तरभारतस्य काशीक्षेत्रे (वाराणसी) जन्म प्राप्तवान् इति परम्परया स्वीक्रियते। एषः चर्मकारकुले जातः, एतस्मात् कारणात् तस्मिन् काले समाजे निम्नजातिरूपेण एतस्य गणना आसीत्। तथापि सन्तरविदासः जातिभेदस्य बन्धनं न स्वीकारोति स्म। बाल्यावस्थायामेव एतस्य हृदये भक्तिः, करुणा, सत्यनिष्ठा च दृढतया प्रतिष्ठिताः। एषः आजीवनं स्वचर्मकारकार्यं न त्यक्तवान्, यतः हि एतस्य मतम् आसीत् यत् कर्मणः त्यागः न आवश्यकः, अपि तु कर्मे भगवद्भावना एव मुख्यं साधनं भवेत्। भक्तिकाले द्वौ मुख्यौ प्रवाहौ दृश्येते— सगुणभक्तिः,निर्गुणभक्तिः।सन्तरविदासः निर्गुणभक्तिपरम्परायाः प्रमुखः स्तम्भः आसीत्। एतस्य भक्तिः निराकारब्रह्मणि केन्द्रिता आसीत्। एषः रामं, हरिं, ईश्वरं च न मूर्तिरूपे, अपि तु सर्वव्यापकचैतन्यरूपेण अनुभवति स्म।

रविदासस्य भक्तिः सरलभावप्रधानाः , आडम्बरवर्जिता , मानवमात्रे समदृष्टिसम्पन्ना च आसीत्। सन्तरविदासः

निर्गुणब्रह्मणः उपासकः आसीत्।एतस्य मतानुसारम् ईश्वरः न जात्या सीमितः,न रूपे बद्धः, न कर्मकाण्डेन प्राप्तव्यः वर्तते। ईश्वरः सर्वत्र विद्यमानः, सर्वेषां हृदयेषु वसति। अतः भक्तिः आत्मनः शुद्ध्या एव सम्भवति। सन्तरविदासस्य चिन्तनस्य केन्द्रीयबिन्दुः जातिभेदविरोधः अस्ति। एषः स्पष्टतया घोषयति स्म यत् यदि ईश्वरः सर्वेषु समानः, तर्हि मनुष्येषु भेदः कुतः?

एतस्य दृष्टौ मानवमात्रं समानम्, कर्मणा एव मानवस्य मूल्यांकनं करणीयम्, न जन्मना। एषः कर्मयोगस्य समर्थकः आसीत्। एषः न संन्यासमार्गं, न वनवासं श्रेष्ठं मन्यते स्म। एतस्य मतम् आसीत् यत् स्वकर्मणि स्थित्वा भगवद्भावनया कर्म कुर्वन्

मनुष्यः मोक्षं प्राप्नोति। अयं विचारः गीतादर्शनस्य समीपवर्ती अस्ति।सामाजिकचिन्तने अपि सन्तरविदासस्य चिन्तनों विशिष्टं वर्तते।एतस्य समाजदर्शनं समतामूलकम् आसीत्। एषः वर्णव्यवस्थायाः विकृतस्वरूपस्य विरोधं कृत्वा समाजे समरसतां स्थापयितुं प्रयत्नम् अकरोत्। एषः ईश्वरभक्तिं मानवसेवया एव भवति इति मन्यते स्म। एतस्य दृष्टौ दरिद्रसेवा, दुःखितोपकारः,

दीनरक्षणं एतानि कार्याणि एव ईश्वरभक्तेः लक्षणानि सन्ति। एतस्य चिन्तनस्य सर्वाधिकं प्रसिद्धं स्वरूपं “बेगमपुरा” इति अवधारणा अस्ति। बेगमपुरा नाम—दुःखरहितं नगरम्,भयशून्यं समाजम्, शोषणजातिभेदवर्जितं राष्ट्रम् इति।अत्र न कोऽपि उच्चः, न नीचः,सर्वे स्वतन्त्राः,सर्वे सुखिनः इति एषा कल्पना आधुनिकलोकतन्त्रस्य, समाजवादस्य च पूर्वरूपा इव दृश्यते।

कार्यक्षेत्र अपि एतस्य योगदानं विशिष्टतमं विद्यते। एतस्य पदानि सरलभाषया रचितानि, ये सामान्यजनानामपि हृदयंगमानि आसन्। एतस्य काव्ये अलंकारानां प्रदर्शनं न्यूनम्, भावस्य प्राधान्यं अधिकं दृश्यते। एतस्य प्रत्येकं पद्यं केवलं भक्तिगीतं न, अपि तु समाजसुधारस्य घोषणापत्रमिव अस्ति। अत्रेदं वयं वक्तुं शक्नुमो यत् सन्तरविदासः केवलं स्वयुगस्य चिन्तकः न आसीत्, अपि तु उत्तरकालीनभक्तपरम्परायामपि एतस्य गभीरः प्रभावः दृश्यते। मीराबाईमहोदया एतस्य भक्तिचिन्तनेन प्रभाविताभवत् । उत्तरभारते निर्गुणभक्तेः प्रसारः अभवत् । दलितचेतनायाः आद्यप्रेरकःअपि एषः एव इति विद्वांसः स्वीकुर्वन्ति। आधुनिकपरिप्रेक्ष्ये सन्तरविदासस्य विचारणां प्रासंगिकता विद्यते। आधुनिकभारते जातिभेदः, सामाजिकविषमता, धार्मिकआडम्बरः अद्यापि विद्यमानाः सन्ति। एतादृशे समये सन्तरविदासस्य विचाराः अत्यन्तं महत्त्वपूर्णाः सन्ति।एते विचाराःअस्मान् शिक्षयति यत् मानवता एव सर्वश्रेष्ठःधर्मो विद्यते । समताभावः एव समाजस्य आधारःअस्ति। भक्तिः कर्मणि, करुणायां, सत्ये च निहिता अस्ति। अत्र वयं वक्तुं शक्नुमः यत् सन्तरविदासः भक्तिकालस्य न केवलं कविः , अपि तु महान् समाजचिन्तकः, दार्शनिकः, मानवतावादी सुधारकः च आसीत्। एतस्य चिन्तनं आडम्बरमुक्तधर्मं मानवसेवायाः मार्गे स्थापयति।एषः मानवान् स्मारयति यत् ईश्वरः मन्दिरे न सीमितः,सः मानवहृदये वसति। अतः सन्तरविदासस्य विचाराणां प्रासंगिकता सर्वदा स्थास्यति एव। वयं एतेभ्यः महापुरुषेभ्यः प्रणामांजलिं समर्पयामः। इत्यलम्।

# भुवनेश्वर्यां गुरुवन्दनमहोत्सवः पुरातनच्छात्राणां भावाञ्जलिः



**हिमसंस्कृतवार्ताः- डॉ. नवीन ममगाईं, उत्तराखण्ड पौडी गढवालः।** पौडी जनपदस्य कोट-विकासखण्डान्तर्गते ब्रिगेडियर- विद्याधर- जुयाल- संस्कृत- महाविद्यालये (जनवरी ३१ तः फरवरी १ पर्यन्तं) अपूर्वः, अनुपमः, हृदयस्पर्शी च 'पुरातनच्छात्रसम्मेलनं गुरुसम्मान-महोत्सवश्च' महता वैभवेन सम्पन्नः। बहुकालानन्तरं स्वविद्यालयस्य प्रति समागतानां पुरातनच्छात्राणां मुखारविन्देषु स्वगुरुन् प्रति श्रद्धायाः, स्वसहपाठिनः प्रति सौहार्दस्य च अपूर्वः आलोकः परिदृश्यते स्म। एषः समागमः केवलं सम्मेलनं नासीत्, अपि तु अतीतस्य सुवर्णस्मृतीनां वर्तमानेन सह कृतः भावनात्मकः अभिषेकः इव प्रतीयते स्म।विद्यालयस्य विकासगाथा गुरुपरम्परा चअस्य विद्याकेन्द्रस्य आधारशिलायाः पञ्चत्रिंशत् शरत्कालाः व्यतीताः। विद्यालयस्य अस्यां गौरवान्वितायां विकासयात्रायां केचन कर्मयोगिनः शिक्षकाः स्वजीवनस्य समिधं समर्पितवन्तः। क्रमेऽस्मिन्न अस्मिन् वर्षे वरिष्ठशिक्षकः नवीनजुयालवर्यः स्वकीयात् सुदीर्घ-सेवाकालात् निवृत्तिं लभते। तेषाम् त्यागस्य, अहोरात्रपरिश्रमस्य, छात्राणां चरित्रनिर्माणे कृतायाः महत्याः साधनायाः च फलस्वरूपमेव अयं विद्यालयः अनुशासनस्य उत्कृष्टं निदर्शनं जातम्। तस्य सारस्वत-साधनायाः सम्मानार्थं सर्वे पुरातनच्छात्राः कार्तज्ञ्यभावेन इमं गुरुसम्मान-उत्सवं सोत्साहम् आयोजितवन्तः।

## सांस्कृतिक-वैभवं गौरवाधानं च-

कार्यक्रमस्य प्रारम्भे मङ्गलमय-दीपप्रज्वलनेन सह भगवत्याः शारदायाः वन्दना कृता। गुरुवन्दनप्रसङ्गे सर्वेभ्यः आचार्येभ्यः प्रावारकं (शाल-वस्त्र) समर्प्य तेषामभिनन्दनं विहितम्। विशेषतः नवीनजुयाल महोदयाय मानपत्रं स्मृतिचिह्नं च प्रदाय तेषां पादपद्मयोः श्रद्धाञ्जलिः अर्पिता। विद्यालयस्य छात्रैः उपस्थापिताः विविधाः सांस्कृतिक-प्रस्तुतयः, नाटकानि, नृत्यगीतानि च उपस्थितानां मनांसि मोहयामासुः।

## गण्यमान्यानां गरिमामयी उपस्थितिः-

समारोहस्यास्य अन्ते आयोजक-मण्डलेन सर्वेभ्यः आगतेभ्यः अतिथिभ्यः, आचार्येभ्यः, पुरातनच्छात्रेभ्यश्च धन्यवादाः व्याहृताः। अस्मिन् पुण्ये अवसरेः

प्रबन्धकः- राजेन्द्र जुयालः,प्रधानाचार्यः- अनसूया प्रसाद सुन्दरियालः,गण्यमान्याः- रतीश कालाः शतीष जुयालः, दुर्गा जुयाल च। **पुरातनच्छात्रवृन्दः**- दीपक नवानी, पंकज ममगाईं, आशीष जुयाल, विनोद बमराडा, शतीष बलूनी, सुनील पोखरियालः, नवीन पन्तः, विकास पन्तः, अनूप कुकरेती इत्यादयः बहवः पुरातन छात्राः उपस्थिताः आसन्।

## पाकिस्तानेन कृतं भारतीय- नागरिकाणां स्वदेशप्रत्यावर्तनम्

पाकिस्तान-देशः अमृतसरस्थस्य 'अटारी-वाघा' संयुक्तान्वेषणस्थलम् (Joint Check Post) इत्यस्य मार्गेण सप्त भारतीयनागरिकान् स्वदेशं प्रेषितवान्। पाक-रेंजर्स-दलस्य अधिकारिणः परह्यः एतान् नागरिकान् सीमा सुरक्षा बलाय (BSF) समर्पितवन्तः। विगत-द्विवर्षात् अधिककालात् तेषां प्रतीक्षां कुर्वतां परिवाराणां कृते एषः अतीवः भावुकः मिलापः आसीत्। अटारी-क्षेत्रस्य शिष्टाचार-अधिकारी (Protocol Officer) अरुणमहलमहोदयानुसारम्, एते सर्वे २०२३ तमे वर्षे पञ्जाब-राज्ये आगतस्य जलौघस्य (Flood) समये यदा सीमावर्ति-मण्डलेषु स्वसम्बन्धिनां साहाय्यं कुर्वन्तः आसन्, तदा अज्ञानेन पाकिस्तान-सीमां प्रविष्टवन्तः। एतेषु चत्वारः फिरोजपुर-मण्डलस्य, एकः जालन्धरस्य, एकः लुधियानायाः तथा च एकः उत्तर-प्रदेशस्य निवासी अस्ति।